# Sheshakrita Shri Ganesha Prarthana

# શેષકૃતા શ્રીગણેશપ્રાર્થના

## Document Information

Text title : Sheshakrita Shri Ganesha Prarthana

File name : gaNeshaprArthanAsheShakRRitA.itx

Category : ganesha, gaNeshapurANa

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 90 | 1.90 26-30||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# શેષકૃતા શ્રીગણેશપ્રાર્થના

ક ઉવાચ ।
તતો વવ્રે વરાન્ શેષો નત્વા સ્તુત્વાખિલેશ્વરઃ ।
અનાદિનિધનં દેવ ! વન્દેઽહં ગણનાયકમ્ ॥ ૨૭॥

સર્વવ્યાપિનમીશાનં જગત્કારણકારણમ્ ।
સર્વસ્વરૂપં વિશ્વેશં વિશ્વવન્દ્યં નમામ્યહમ્ ॥ ૨૮॥

ગજાનનં ગણાધ્યક્ષં ગરુડેશસ્તુ તં વિભુમ્ ।
ગુણાધીશં ગુણાતીતં ગણાધીશં નમામ્યહમ્ ॥ ૨૯॥

વિદ્યાનામધિપં દેવ ! દેવદેવં સુરપ્રિયમ્ ।
સિદ્ધિબુદ્ધિપ્રિયં સર્વસિદ્ધિદં ભુક્તિમુક્તિદમ્ ॥ ૩૦॥

સર્વવિઘ્નહરં દેવં નમામિ ગણનાયકમ્ ।
ક ઉવાચ ।
એવં સ્તુત્વા તુ દેવેશં વરદં દ્વિરદાનનમ્ ॥ ૩૧॥

વરયામાસ યાન્ કામાંસ્તાં શ‌ૃણુષ્વ મહામને ।
શેષ ઉવાચ ।
અદ્ય ધન્યં તપો જ્ઞાનં પિતા માતા જનુર્મમ ॥ ૩૨॥

દેહો નેત્રાણિ ભૂરીણિ મસ્તકાનિ બહૂનિ ચ ।
ત્વાં સ્તોતું સમ્પ્રવૃત્તા યા ધન્યાસ્યા રસના મમ ॥ ૩૩॥

કુલં શીલં ચધન્યં મે ત્વઙ્ઘ્રિયુગદર્શનાત્ ।
અખણ્ડિતં તે ભજનં દેહિ મેઽખણ્ડવિક્રમ ॥ ૩૪॥

દુઃખં કિં કિં નુ વક્તવ્યં સર્વજ્ઞે ત્વયિ વિઘ્નરાટ્ ।
અખર્વગર્વકરણાત્ સ્ફુટિતા મસ્તકા મમ ॥ ૩૫॥

મહારુષા મહેશેનાઽઽસ્ફાલિતસ્ય મહીતલે ।

નારદસ્ય પ્રસાદેન દૃષ્ટં તે ચરણામ્બુજમ્ ।
ઇદાનીં દેવ ! મે દેહિ શ્રેષ્ઠતાં ભુવનત્રયે ॥ ૩૬॥

પાટવં સર્વશિરસિ સામર્થ્યં ધારણે ભુવઃ ।
અચલં દેહિ મે સ્થાનં દર્શનં તે નિરન્તરમ્ ॥ ૩૭॥

સાન્નિધ્યં શઙ્કરસ્યાપિ કુલશ્રેષ્ઠ્યં શિવે રતિમ્ ।
ગણપતિરુવાચ ।
યદિ તે દશધા જાતો મસ્તકો ભુજગાધિપ ॥ ૩૮॥

તદા સહસ્રવદનઃ સહસ્રફણિમણ્ડિતઃ ।
ભવિષ્યસિ જને ખ્યાતો યાવચ્ચન્દ્રાર્કતારકાઃ ॥ ૩૯॥

ધરાધરણસામર્થ્યં દૃઢં તવ ભવિષ્યતિ ।
પઞ્ચાસ્યપઞ્ચશિરસિ મત્પ્રસાદાત્ સ્થિતિં સ્થિરામ્ ॥ ૪૦॥

લપ્સ્યસે ભુજગશ્રેષ્ઠ ! મત્સાન્નિધ્યં નિરન્તરમ્ ।
અન્યત્ તે વાઞ્છિતં શેષ ! તદશેષં ભવિષ્યતિ ॥ ૪૧॥

ઇતિ શેષકૃતા શ્રીગણેશપ્રાર્થના સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૯૦ । ૧.૯૦ ૨૬-૩૦॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 90 . 1.90 26-30..

Proofread by Preeti Bhandare

*Sheshakrita Shri Ganesha Prarthana*
pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*